**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य थाईलैण्डदेशस्य बैंकॉकनगरे बहुक्षेत्रीयतकनीकी आर्थिकसहकार्यस्य बिमस्टेक इत्यस्य षष्ठे बङ्गालखात्याः परिकल्पनायां भागं गृहीतवान्।
- प्रधानमन्त्री मोदी बिमस्टेक शिखरसम्मेलनावधौ बाङ्ग्लादेश-भूटान-म्यांमार-देशानां नेतृभिः सह मिलितवान् ।
- अद्य संसद: उभयो: सदनयो: कार्यान्वयनं आय-व्यय सत्रं च समाप्तम्।
- पद्मश्री-दादासाहेब फाल्के पुरस्काराभ्याम् सम्मानित: सुप्रसिद्ध: अभिनेता मनोजकुमार: अद्य प्रात: मुंबई नगरे मृत्युमुपगत:।
- अस्य पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य मुष्टामुष्टीविश्वचषक-स्पर्धायां भारतीयः मुष्टामुष्टी-क्रीडकः हितेशः अद्य ब्राजीलदेशे पुरुषाणां सप्ततिः किलोग्रामवर्गमितस्य निर्णायकद्वन्द्वे प्रविश्य, देशाय रजतपदकं सुनिश्चितवान्।

**प्रधानमन्त्री-थाइलैंड**

प्रधानमन्त्री नरेन्द्रमोदी अद्य थाईलैण्डदेशस्य बैंकॉकनगरे बहुक्षेत्रीयतकनीकी आर्थिकसहकार्यस्य बङ्गालखात्याः परिकल्पनायां षष्ठे बिमस्टेक इति शिखरसम्मेलने भागं गृहीतवान्। शिखरसम्मेलने प्रवदन् प्रधानमन्त्री क्षेत्रीयसहकार्यं वर्धयितुं, संलग्नतां गभीरं कर्तुं च मञ्चस्य सुदृढीकरणस्य आवश्यकतायां बलं दत्त्वा वैश्विक-हितं प्रवर्धयितुं बिम्स्टेक इति महत्त्वपूर्णं मञ्चं इति वर्णितवान्। सः सहकार्यस्य विभिन्नपक्षाणां समाविष्टानां एकविंशतिः बिन्दुयुतं कार्ययोजनां प्रस्तावितवान्। बिम्स्टेक-राष्ट्रेषु व्यापारं वर्धयितुं समयः अस्ति इति प्रवदन् श्री मोदी बिम्स्टेक-वाणिज्यसङ्घस्य स्थापनायाः, प्रतिवर्षं बिम्स्टेक-व्यापार-शिखर-सम्मेलनस्य आयोजनस्य च घोषणां कृतवान्, श्रीमोदी बिम्स्टेकक्षेत्रे स्थानीयमुद्रायाः व्यापारस्य सम्भावनासु एकस्य व्यवहार्यता अध्ययनस्य प्रस्तावः प्रस्तावितवान्। प्रधानमन्त्रिणा बिम्स्टेक-समुद्रीपरिवहन-सन्धि पत्रे हस्ताक्षरं, बिम्स्टेक-बैङ्कॉक-दृष्टि-त्रिंशोत्तर द्विसहस्र-अनुमोदनं, बिम्स्टेक-प्रख्यातव्यक्तिसमूहस्य प्रतिवेदनस्य च स्वागतं कृतम्। बिम्स्टेक सदस्य देशाः अपि शिखरसम्मेलनस्य घोषणाम् अङ्गीकृतवन्तः। प्रधानमन्त्री मोदी शिखरसम्मेलनावधौ बाङ्ग्लादेश -भूटान-म्यांमार-देशानां नेतृभिः सह मिलितवान् । श्रीमोदी बाङ्ग्लादेशस्य मुख्यपरामर्शदेन मुहम्मदयुनुस् इत्यनेन सह द्विपक्षीयोपवेशनं कृतवान्। श्रीमोदी भूटानस्य स्वसमकक्षेण शेरिंग् टोबगे इत्यनेन सहापि मिलितवान् ।

**संसद-स्थगित**

अद्य संसद: उभयो: सदनयो: कार्यान्वयनं आय-व्यय सत्रं च समाप्तम् जातम्। ध्येयास्पदं वर्तते यत् सत्रमिदं जनवरी मासस्य एकत्रिंशे दिनांके आरब्धम् आसीत्। लोकसभायां सत्रस्यास्य समापनभाषणे लोकसभा अध्यक्ष: ओम-बिरला प्रतिपादितवान् यत् आय-व्यय सत्रावधौ सदने अष्टादशोत्तरैक शत-प्रतिशत मितात्मिकाया: वृद्धि: पञ्जीकृतास्ति। स: प्रोक्तवान् यत् सत्रावधौ निम्नसदने षोडश विधेयकानि पारितानि।

इत: पूर्वं संसदीय कार्यमंत्री किरेन रिजिजू प्रोक्तवान् यत् पञ्चविंशत्यधिकद्विसहसतमे वर्षे राज्यसभायां वक्फ संशोधन विधेयकमालक्ष्य प्तदशहोरादधिक परिचर्चा सञ्जाता। तत्रैव लोकसभायां चतुर्दश होरा पर्यन्तं परिचर्चा जाता। संसदि विधेयकं बलात् स्थापितम् इति कांग्रेसदलस्य नेत्र्या: सोनियागाधिन: एताम् टिप्पणीमालक्ष्य किरेन रिजिजू वर्येण आपत्ति: प्रकटित:। लोकसभा अध्यक्ष: ओमबिरला एताम् टिप्पणीं दुर्भाग्यपूर्णं प्रतिपादयन् प्रोक्तवान् यत् सर्वेषां नियमानां प्रक्रियायां च अनुपालनं कुर्वन् विधेयकमिद पारितम् जातमस्ति।

**मनोज कुमार**

पद्मश्री-दादासाहेब फाल्के पुरस्काराभ्याम् सम्मानित: सुप्रसिद्ध: अभिनेता मनोजकुमार: अद्य प्रात: मुंबई नगरे मृत्युमुपगत:। स: सप्ताशीति वर्षीय: आसीत्। तस्य पुत्र: कुणाल गोस्वामी अवदत् यत् तस्य पिता दीर्घाकालादेव रुग्ण: आसीत्। तस्य अग्निमुख-संस्कार: श्व: प्रात: मुंबईनगरस्य विले पार्ले इत्यत्र भविष्यति।

**मन्त्रिपरिषद्**

केन्द्रीयमन्त्रिमण्डलेन रेलमन्त्रालयस्य चतुर्णां परियोजनानां अनुमोदनं कृतम् यस्य कुलव्ययः अष्टपञ्चाशदधिक षड्शतोत्तर अष्टादशसहस्र कोटिरूप्यकाणि सन्ति। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, एताः परियोजनाः त्रयाणां राज्यानां महाराष्ट्रस्य, ओडिशायाः, छत्तीसगढस्य च पञ्चदश मण्डलानि आक्षादयन्ति तथा च भारतीयरेलवेत्यस्य विद्यमानानि मार्गजालानि प्रायः सार्धद्वादशशतं किलोमीटर् परिमितं यावत् वर्धयिष्यन्ति।

मन्त्रिमण्डलेन ऊनचत्वारिंशोत्तर अष्टशताधिक-षड्सहस्र कोटिरूप्यकाणां कुलव्ययेन सह शतप्रतिशतम् केन्द्रीयवित्तपोषणेन जीवन्तग्रामकार्यक्रम-द्वितीयस्य अनुमोदनं च कृतम्।

**बीजेपी-कांग्रेस – वक्फ**

भारतीयजनतापार्टीतिदलेन प्रोक्तं यत् वक्फ संशोधन विधेयकं संसद: उभयो: सदनयो: पूर्ण-विधिरीत्यानुसारं पारितं अस्ति। विधेयकमिदं न्यायालये कांग्रेसदलस्य नेतु: प्रस्तुतीकरणस्य विषये भाजपादलस्य वरिष्ठनेता रविशंकरप्रसाद: अवदत् यत् न्यायालये गन्तुं न कोऽपि बाधित: अस्ति।

इत: पूर्वं कांग्रेसनेता प्रमोद तिवारी प्रोक्तवान् यत् विधेयकमिदं संविधानस्य आधारभूत मूल्यानां उल्लंघनं करोति।

**संसद-वक्फ विधेयक**

प्रधानमन्त्री नरेन्द्रमोदी एकस्मिन् अन्तर्जालीय पटल संदेशे प्रोक्तवान् यत् संसद: उभयो: सदनयो: वक्फ संशोधन विधेयकस्य अपि च मुस्लिम वक्फ निरसन इति विधेयकस्य पारिते सति सामाजिक-आर्थिक न्याय, पारदर्शितां समेत्य समावेशी विकासे ऐतिहासिकं पदक्षेप: वर्तते। अस्य विधे: उद्देश्यं वक्फ संपत्तीनां प्रबन्धनं सुव्यवस्थितं च करणीयमस्ति।

**मुष्टामुष्टी-विश्वचषक**

अस्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य मुष्टामुष्टीविश्वचषक-स्पर्धायां भारतीयः मुष्टामुष्टी-क्रीडकः हितेशः अद्य ब्राजीलदेशे पुरुषाणां सप्ततिः किलोग्रामवर्गमितस्य निर्णायकद्वन्द्वे प्रविश्य, देशाय रजतपदकं सुनिश्चितवान्। सः उपान्त्यचक्रीय-क्रीडायां फ्रान्स्-देशस्य माकन् ट्रोरे-इत्यमुं पञ्च-शून्यम् इत्यंकान्तरालेन पराजितवान् । तत्रैव अन्ये त्रयः भारतीय मुष्टामुष्टीक्रीडकाः जदुमणिसिंहः, सचिनसिवाचः, विशालः च विभिन्नेषु वर्गेषु स्वस्व-उपान्त्यचक्रीय-क्रीडायां पराभूय कांस्यपदकं प्राप्तवन्तः।

**आई.पी.एल्.स्पर्धा**

आई.पी.एल्. इत्येतस्यां स्पर्धामालिकायाम् अद्य लखनऊ-सुपर-जायंट्स मुम्बईइंडियन्स-दलयो: मध्ये एकाना क्रिकेट् क्रीडांगणे स्पर्धा भविष्यति। स्पर्धाया: प्रसारणं सायं सार्धसप्तवादने भविष्यति। ध्यातव्यम् अस्ति यत् अस्याम् श्रृंखलायां मुम्बई इंडियन्स दलं अंकतालिकायां षष्ठेस्थाने वर्तते अपि च लखनऊ सुपर जायंट्स इतिदलं सप्तमे स्थाने वर्तते।

**।। इति वार्ता: ।।**